# Mantraraja Stava

# મન્ત્રરાજસ્તવઃ

## Document Information

Text title : Mantraraja Stava

File name : mantrarAjastavaH.itx

Category : shiva, mantra, aShTottarashatanAma

Location : doc_shiva

Proofread by : Aruna Narayanan

Description/comments : From Atmanatha Stuti Manjari, Ed. S. V. Radhakrishna Sastri. See corresonding nAmAvalI.

Latest update : December 12, 2022

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2022

*sanskritdocuments.org*

# મન્ત્રરાજસ્તવઃ

(ધૌમ્યેનોપદિષ્ટઃ પુરૂરવસે ।)
અસ્ય શ્રી મન્ત્રરાજસ્તવસ્ય બ્રહ્મા ઋષિઃ । અનુષ્ટુપ્ છન્દઃ । શ્રી
આત્મનાયકો દેવતા । ૐ બીજં, હ્રીં શક્તિઃ, ક્લીં કીલકં, શ્રી
આત્મનાથપ્રસાદાર્થે જપે વિનિયોગઃ । હ્રાં અઙ્ગુષ્ઠાભ્યાં નમઃ । હ્રીં તર્જનીભ્યાં
સ્વાહા । હ્રૂં મધ્યમાભ્યાં વષટ્ । હ્રૈં અનામિકાભ્યાં હુમ્ । હ્રૌં કનિષ્ઠિકાભ્યાં
વૌષટ્ । હ્રઃ કરતલકરપૃષ્ઠાભ્યાં ફટ્ । એવં હૃદયાદિ ન્યાસઃ ।
ભૂર્ભુવસ્સુવરોમિતિ દિગ્બન્ધઃ ॥

ધ્યાનમ્-
તુર્યાતીતપદોર્ધ્વગં ગુણપરં સત્તામયં સર્વગં
સમ્વેદ્યં શ્રુતિશીર્ષકૈરનુપમં સર્વાધિકં શાશ્વતમ્ ।
ઓઙ્કારાન્તરબિન્દુમધ્યસદનં હ્રીઙ્કારલભ્યં નુમો
વ્યોમાકારશિખાવિભાવિમુનિસન્દૃશ્યં ચિદાત્મેશ્વરમ્ ॥

લં ઇત્યાદિ પઞ્ચપૂજા ।
ઓઙ્કારગમ્ય ઓઙ્કારવાચ્ય ઓઙ્કારવિગ્રહઃ ।
ઓઙ્કારશુક્તિકામુક્તામણિરોઙ્કારવલ્લભઃ ॥ ૧॥

ઓઙ્કારબિલપઞ્ચાસ્ય ઓઙ્કારસુષિરોરગઃ ।
ઓઙ્કારપઞ્જરશુક ઓઙ્કારાન્તરવાસકઃ ॥ ૨॥

ઓઙ્કારનલિનીહંસ ઓઙ્કારાવાલકન્દરઃ ।
ઓઙ્કારસુમસૌરભ્ય ઓઙ્કારશમિહવ્યવાટ્ ॥ ૩॥

ઓઙ્કારગોક્ષીરસર્પિરોઙ્કારામ્બરભાસ્કરઃ ।
ઓઙ્કારદીપસુજ્યોતિરોઙ્કારદ્વિજરાટ્સુધા ॥ ૪॥

ઓઙ્કારવેદોપનિષદોઙ્કારફલસદ્રસઃ ।
ઓઙ્કારનવમાણિક્યસૌધસન્નિષ્ઠભૂપતિઃ ॥ ૫॥

નગેન્દ્રતનયાનાથો નાનારૂપસમન્વિતઃ ।
નવનીલઘનશ્યામકન્ધરો નાગકુણ્ડલઃ ॥ ૬॥

નમજ્જનામરતરુર્નટનોત્સુકમાનસઃ ।
નાગભુગ્વાહજનકો નક્ષત્રેશશિખામણિઃ ॥ ૭॥

નવકર્પૂરગૌરાઙ્ગો નલિનેક્ષણસાયકઃ ।
નાદબિન્દુકલાતીતો નાગચર્મોત્તરીયકઃ ॥ ૮॥

નાગાસ્યજનકો નમ્યો નન્દિકેશસમર્ચિતઃ ।
નારાયણાર્ચિતો નાનાનિગમોદિતમૂર્તિમાન્ ॥ ૯॥

નારસિંહમહાદર્પકદલીવનકુઞ્જરઃ ।
નવન્નવનમલ્લોકસઙ્ઘકારુણ્યવાર્ષિકઃ ॥ ૧૦॥

નમદ્બ્રહ્માદિકોટીરનવરત્નોજ્જ્વલાઙ્ઘ્રિકઃ ।
માયાતીતો મહામાયી મનોવાચામગોચરઃ ॥ ૧૧॥

મઞ્જુલાઙ્ગો મહાયોગી મહામેરુશરાસનઃ ।
મન્મથધ્વંસકો મૌની મધુધારાતિભાષકઃ ॥ ૧૨॥

મહીરથો મહાદેવો મહોક્ષવરવાહનઃ ।
માધુર્યજાહ્નવીવીચીસમ્પ્લાવિતજટાતટઃ ॥ ૧૩॥

મનોરથફલાતીતવરપ્રદપદામ્બુજઃ ।
મહાપ્રલયસઞ્ચારી મહાકાલો મહાનટઃ ॥ ૧૪॥

મધુરાપુરમધ્યસ્થવિમાનાન્તરવાસકઃ ।
માર્તાણ્ડકોટિસદૃશો માયાપુરનિવાસકઃ ॥ ૧૫॥

શિવાકૃતિઃ શિવાકારઃ શિવાનન્દવપુર્ધરઃ ।
શિવાપ્રિયઃ શિવાજ્ઞેયઃ શિવયોગવનેશ્વરઃ ॥ ૧૬॥

શિવાધારઃ શિવમયઃ શિવાસક્તહૃદમ્બુજઃ।
શિવાઙ્ગીકૃતવામાઙ્ગઃ શિવલોકેશ્વરઃ શિવઃ ॥ ૧૭॥

શિવાસહાયઃ શિખિદૃક્છિખણ્ડી શિવલોકદઃ ।
શિવક્ષેત્રવિલાસી ચ શિખરીન્દ્રનિકેતનઃ ॥ ૧૮॥

શિવભક્તહૃદમ્ભોજનિવાસી શિવપૂઃપતિઃ ।
વાગ્મી વરિષ્ઠો વરદો વાતાશવિલસત્કરઃ ॥ ૧૯॥

વસુપ્રદો વાસુદેવવર્યચક્રાયુધપ્રદઃ ।
વરકુન્દદ્રુમાવાસી વટમૂલતટાશ્રયઃ ॥ ૨૦॥

વસુન્ધરામરાકારો વન્દ્યો વાત્સલ્યવારિધિઃ ।
વામદેવો વર્યવર્યો વરાભયકરામ્બુજઃ ॥ ૨૧॥

વસુરેતા વરેણ્યશ્ચ વાસવાદ્યમરાર્ચિતઃ ।
વશીકૃતાખિલાણ્ડશ્ચ વાક્પ્રદો વરદેશિકઃ ॥ ૨૨॥

યજ્ઞકૃદ્યજ્ઞહૃદ્યજ્ઞધ્વંસી યજ્ઞેશ્વરો યમી ।
યમાદ્યષ્ટાઙ્ગસન્દૃશ્યો યન્તા યજ્ઞવિદુત્તમઃ ॥ ૨૩॥

યથેચ્છાસૃષ્ટભુવનો યથાર્થજનવત્સલઃ ।
યતાશ્રિતજનક્લેશો યજ્ઞસન્દૃશ્યવિગ્રહઃ ॥ ૨૪॥

યમપ્રહર્તા યક્ષેશસખા યાતુગુણાન્તકઃ ।
યજ્ઞમૃગ્યો યજ્ઞસાધ્યો યજ્ઞવિશ્રાન્તિભૂરુહઃ ॥ ૨૫॥

યતીશો યતિચિત્તારવિન્દનૃત્તવિધાયકઃ ॥ ૨૬॥

આત્માઽન્તરાત્મા પરાત્માઽઽદિકૈલાસનાયકઃ ।
આત્મનાથસ્તીર્થનાથઃ શબ્દનાથઃ સદાશિવઃ ॥ ૨૭॥

અષ્ટવિંશોત્તરશતૈરેતૈર્નામભિરુજ્જ્વલમ્ ।
અખણ્ડં મન્ત્રરાજાખ્યસ્તવમબ્જભવોદિતમ્ ॥ ૨૮॥

સકૃત્ પઠિત્વા મનુજઃ શ્રુત્વા વા સર્વભોગભુક્ ।
સર્વાઘૌઘવિનિર્મુક્તઃ સ જીવેચ્છરદઃ શતમ્ ॥ ૨૯॥

ઇતિ ધૌમ્યેનોપદિષ્ટઃ પુરૂરવસે કૃતઃ શ્રીમન્ત્રરાજસ્તવઃ ।

Proofread by Aruna Narayanan

---

*Mantraraja Stava*

pdf was typeset on December 22, 2022

Please send corrections to *sanskrit@cheerful.com*